अलिक्षत्[1] इति 'शल इगुपधादनिटः क्सः' (३. १. ४५/२३३६) इति [2]क्सो यथा स्यात्। रुदिहि, [3]स्वपिहि इति वलादिलक्षण इड् यथा (७.२.७६/२४७४) स्यात्[4]। अदाग्धाम्। [5]झल्ग्रहणेषु च (८.२.२६/२२८१) हकारस्य ग्रहणं यथा स्यात्। [6]यद्येवम्, ह य व र ट् इत्यत्र तर्हि किमर्थमुपदिश्यते? महाँ हि सः, देवा[7] हसन्ति इत्यत्र अड्ग्रहणेषु (८.३.३/३६३२) चाश्ग्रहणेषु (८.३.२२/१७१) च [8]हकारस्य ग्रहणं यथा स्यात्। ब्राह्मणो हसति–'हशि[9] च' (६. १. ११४/१६६) इत्युत्वं यथा स्यात्।

एकस्मान् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः॥

इति॥

इति [10]प्रत्याहारप्रकरणम्।

## वृद्धिरादैच्। (१/१६)

वृद्धिशब्दः सञ्ज्ञात्वेन विधीयते, प्रत्येकम् आदैचां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च। तपरकरणमैजर्थम् तादपि परः तपरः इति, [11]खट्वैडकादिषु [12]त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये। [13]आश्वलायनः। ऐतिकायनः। औपगवः। औपमन्यवः। शालीयः। मालीयः। वृद्धिप्रदेशाः[14] – 'सिचि वृद्धिः परस्मैपदेषु' (७. २. १/२२९७) इत्येवमादयः॥

## अदेङ् गुणः। (२/१७)

गुणशब्दः [15]सञ्ज्ञात्वेन विधीयते, प्रत्येकम् अदेङां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च। तपरकरणं त्विह सर्वार्थम्। तरिता। चेता। स्तोता। [16]जयन्ति। [17]अहं पचे। गुणप्रदेशाः – [18]'मिदेर्गुणः' (७. ३. ८२/२३४६) इत्येवमादयः॥

## इको गुणवृद्धी। (३/३४)

परिभाषा इयं [19]स्थानिनियमार्था। अनियमप्रसङ्गे नियमो [20]विधीयते। वृद्धिगुणौ स्वसञ्ज्ञया शिष्यमाणौ इकः एव स्थाने [21]वेदितव्यौ। वक्ष्यति – 'सार्वधातुकार्धधातुकयोः' (७. ३.८४/२१६८) अङ्गस्य गुण [22]इति। स [23]इक एव स्थाने [24]वेदितव्यः। तरति। नयति। [25]भवति।

---

1. अधुक्षत ग. 2. क्से ग. 3. स्वपिहि नास्ति ग. 4. स्यात् नास्ति ग. 5. इत्यत्र अ. क. ड, सिचो लोपः, अड्ग्रहणेषु, हशि च, इति वा फ. 6. एवं नास्ति फ. 7. देवो हसति फ, एतन्नास्ति ग. प. मं. न्यास 8. हकारस्य नास्ति ह. 9. हशि च नास्ति फ. 10. प्रत्याहाराः ई. 11. ऋक्षैडकादिषु क, वाग्वैलकादिषु ह. 12. त्रिमात्रचतुर्मात्रनिवृत्त्यर्थः ह. 13. आश्वलायनः नास्ति फ, कापटवः इत्यधिकं ड. 14. एषा पङ्क्तिः नास्ति फ. अस्याः स्थाने 'मृजेर्वृद्धिः' (7. 2. 114/2473), 'वृद्धिर्यस्याचामादिस्तद् वृद्धम्' (1. 1. 73/1335) इत्येवमादयः ग.ड.ह. 15. संज्ञात्वेन विधीयते नास्ति फ. 16. यजति इत्यधिकं क. फ, पठन्ति न्या. 17. अहं नास्ति फ. 18. 'गुणो यङ्लुकोः' (7.4. 82/2630) फ. ड, 'गुणोऽपृक्ते' (7.3. 91/2448) ग. 19. स्थानिनियमार्थम् ब. 20. क्रियते ग. 21. भवतः इति वेदितव्यम् ग. ह. 22. इति नास्ति फ. 23. इकः स्थाने भवति अ. 24. कर्तव्यः ब. ह. 25. भवति नास्ति ह.